तु दृष्टेन प्रयोगवचनेन-इति नैष दोषः अश्रूयमाणेऽपि दृष्टेन भुजिना न फलवचनेन। 'कथं तर्हि-नियमाद-दृष्टं भवति-इति गम्यते'। यथैव अवदोषे पक्षे। आह अश्रूयमाणे फलवत एकवाक्यभावात् फलवत उपकरोति इति गम्यते'। उच्यते अश्रूयमाणेऽपि फलवत एवैकवाक्यभावः, एतावांस्तु विशेषः-तत्र श्रुतं फलं मम तु दृष्टम्। अथ यत् लिङ्गम् उक्तं—गृहदाहादिषु कर्म श्रूयते-इति। तत्र उच्यते यद्यपि न क्रत्वर्थं द्रव्यार्जनं तथापि दाहे निमित्ते फलाय वा कर्माङ्गभावाय वा क्षामवत्यादीनां विधानम् उपपद्यत एव। तस्मात् पुरुषार्थं द्रव्यार्जनं प्रीत्या हि तदविभक्तम्" भाष्यम् तत आरभ्य क्रत्वर्थाः पदार्थास्तत्र दर्शिताः तत एवावगन्तव्याः

**क्रत्वादि** पु॰ पाणिन्युक्ते सोः परतः स्थितस्य आद्युदात्ततानिमित्ते शब्दगणे। स च गणः "क्रतु दृशीक प्रतीक प्रकृति हव्य भग"।

**क्रत्वीश्वर** न॰ क्रतुना स्थापितमीश्वरलिङ्गम्। काश्याम् क्रतुना मुनिना स्थापिते शिवलिङ्गभेदे "वरणायास्तटे रम्ये क्रत्वीश्वरमनुत्तमम्। वाशिष्ठमीश्वरञ्चैव लभते वसतिं त्विह" काशी॰ १८अ॰

**क्रथ** बधे भ्वा॰ पर॰सक॰ सेट् घटा॰। क्रथति अक्रथीत्-अक्राथीत्। चक्राथ, णिच्—क्रथयति-ते। अचिक्रथत् त

**क्रथ** प्रतिहर्षे चु॰ उभय॰ सक॰ सेट् घटा॰। क्राथयति-ते अचिक्रथत्-त। क्रथयां-बभूव आस चकार चक्रे

**क्रथन** न॰ क्रथ-बधे ल्युट्। १मारणे २छेदने च "राजन्योष्ट्रांसकूट क्रथनपटुरिति" प्रबोधचन्द्रोदयः। ३दानवभेदे पु॰। "क्रथनश्च महावीर्य्यः" भा॰ आ॰ ६७अ॰।

**क्रथनक** पुंस्त्री क्रथने दन्तकरणककण्टकच्छेदने प्रसृतः कन्। उष्ट्रे अमरः स्त्रियां जातित्वात् ङीष्।

**क्रथकैशि(शी)क** पु॰ब॰व॰ देशभेदे "सपाण्ड्यान् क्रथकैशीकान्" भा॰ स॰ १२०श्लो॰ "अधेश्वरेण क्रथकैशिकानाम्" "प्रत्युज्जगाम क्रथकैशिकस्तम्" रघुः। ह्रस्वमध्यात् संज्ञायां कन्। सितागुरुणि न॰ शब्दच॰।

**क्राद** रोदने वैकल्ये अक॰ आह्वाने सक॰ भ्वा॰ पर॰ इदित् सेट्। क्रन्दति अक्रन्दीत् चक्रन्द। भावे क्रन्द्यते क्रन्दितम्। अव्यक्तशब्दकरणे "अक्रन्ददग्निः स्तनयन्निव द्यौः" यजु॰ १२।६। अक्रन्दत् क्रन्दति विस्फूर्जति" वेददी॰। "यदक्रन्दः प्रथमं जायमानः" यजु॰ २६,१२। [आति अनु+क्रन्दनेनानुगमने सक॰ अनुक्रन्दति पुत्रम् क्रन्दनेनानु-

अभि+आभिमुख्येन शत्रुप्रभृतेराह्वाने सक॰। "अभिक्रन्दन् वृषायसे" ऋ॰ १०।२२।८। "अभिक्रन्दन् आभिमुख्येन युद्धार्थं शत्रूनाह्वन्" भा॰। "आभिमुख्येन शब्दकरणे अक॰। 'अभिक्रन्द स्तनय गर्भम्" ऋ॰ ५।८३।७। "अभिक्रन्द भूम्यभिमुखं क्रन्द शब्दाय" भा॰।

आ+आह्वानपूर्व्वकरोदने सक॰। "आक्रन्दत् भीमसेनं वै" भा॰ व॰ १५७अ॰। सम्यक्क्रन्दने च "आक्रन्दिषुः सखीनह्वन्" भट्टिः। "तदीयमाक्रन्दितमार्त्तसाधोः" रघुः। सम्+आ+सम्यगाह्वानपूर्व्वकक्रन्दने "हा तात! धर्म्मराजेति समाक्रन्दन्महाभये" भा॰ आश्व॰ १०७२श्लो॰

नि+यथानामशब्दोच्चारणे। "न्यक्रन्दीज्जन्म प्रभुवाणो यथास्य शब्दस्तथा नामेरयति वाचम्" निरु॰ ८।४। प्र+स्तवने "प्र वः स्पडक्रन् सुविता यः" ऋ॰ ५।५९।१। "अक्रन् स्तौति" भा॰ वेदे गणव्यत्ययात् शपोलुक्। वि+विशेषेण क्रन्दने। सम् सम्यक् क्रन्दने।

**क्रद** वैकल्ये भ्वा॰ आत्म॰ अक॰सेट् घटादि॰। क्रदते अक्रदिष्ट चक्रदे णिच् क्रदयति। यङ् वेदे कनिक्रद्यते यङ्लुकि कनिक्रत्ति कनिक्रदीति "उपस्थे वृषभः कनिक्रदत्" ऋ॰९।७७।५। "कनिक्रदत् शब्दं कुर्वन्" भा॰। अनु+अनुगमने सक॰। "संनशेयं चौणीरनुचक्रदे" ऋ॰ ८।३।१०। "अनुचक्रदे अनुगच्छति" भा॰।

**क्रन्द** निरन्तरशब्दकरणे चुरा॰ अक॰ उभ॰सेट्। प्रायेणाङ्पूर्व्वः आक्रन्दयति ते आचक्रन्दत् त। आक्रन्दयाम् बभूव आस चकार चक्रे

**क्रन्दन** न॰ क्रदि—भावे ल्युट्। १शोकादिनाऽश्रुपातहेतुव्यापारे रोदने शब्दरत्ना॰ योधवीरादेः २आह्वाने च अमरः ३विडाले पुंस्त्री शब्दमा॰। स्त्रियां जातित्वात् ङीष्।

**क्रन्दित** न॰ क्रदि—भावे क्त। रोदने अमरः। आह्वाने मेदि॰ योधानां चीत्कारशब्दकरणे शब्दरत्ना॰।

**क्रप** कृपायाम् भ्वा॰ अक॰ आत्म॰ सेट् घटादि। क्रपते अक्रपिष्ट चक्रपे णिचि क्रपयति ते। "उतत्वाहुर्मेववज्ञक्रपिष्ट" ऋ॰७।२०।९। वेदेऽस्य क्वचित् संप्रसारणम्। "उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः" ऋ॰ ८।६६।४। "विन्दन्त ज्योतिश्च कृपन्त धीभिः" ऋ॰ ४।१।१४। "मर्तानां चिदुर्वशीरकृपन्" ऋ॰ ४।२।१८। "विश्वे देवा अक्रपन्त समीच्योर्निष्टतन्त्यः" ऋ॰ १०।२४।५। "कविं कृपमाणमकृणुतं विचक्षे" ऋ॰ १।११६।१४।

**क्रम** पादविक्षेपणेन गतौ भ्वा॰पर॰सक॰ सेट्। अस्य सार्व्व-